## दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु। (१०३/३८३७)

दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि भवन्ति ग्रामजनपदाख्यानवाचिषु उत्तरपदेषु, चानराटशब्दे च। पूर्वेषुकामशमी, पूर्वषुकामशमी। अपरेषुकामशमी, अपरेषुकामशमी। पूर्वकृष्णमृत्तिका। अपरकृष्णमृत्तिका। [1]जनपद – पूर्वपञ्चालाः। अपरपञ्चालाः। आख्यान – पूर्वाधिरामम्, पूर्वाधिरामम्। पूर्वयायातम्। अपरयायातम्। अधिराममधिकृत्य कृतो ग्रन्थः आधिरामम्। तथा यायातम्। चानराट – पूर्वचानराटम्। अपरचानराटम्। शब्दग्रहणं कालवाचिनोऽपि दिक्शब्दस्य परिग्रहार्थम्॥

## आचार्योपसर्जनश्चान्तेवासिनि। (१०४/३८३८)

आचार्योपसर्जनान्तेवासिवाचिनि उत्तरपदे दिक्शब्दा[2] अन्तोदात्ताः भवन्ति। पूर्वपाणिनीयाः। अपरपाणिनीयाः। पूर्वकाशकृत्स्नाः। [3]अपरकाशकृत्स्नाः। आचार्योपसर्जनः इति किम्? पूर्वशिष्याः। अन्तेवासिनि इति किम्? [4]पूर्वपाणिनीयं शास्त्रम्॥

## उत्तरपदवृद्धौ सर्वं च। (१०५/३८३९)

'उत्तरपदस्य' (७.३.१०/१३९६) इत्यधिकृत्य या विहिता वृद्धिः, [5]तद्वत्युत्तरपदे सर्वशब्दो दिक्शब्दाश्च अन्तोदात्ता भवन्ति। सर्वपाञ्चालकः। [6]पूर्वपाञ्चालकः। उत्तरपाञ्चालकः। सुसर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिना जनपदलक्षणो (४.२.१२५/१३४९) वुञ् प्रत्ययः। 'सुसर्वार्धज्जनपदस्य' (७.३.१२/१३९८) 'दिशोऽमद्राणाम्' (७.३.१३/१३९९) इति [7]चोत्तरपदवृद्धिः। [8]अधिकारलक्षणादिह न भवति, सर्वमासः, सर्वकारकः इति॥

## बहुव्रीहौ विश्वं सञ्ज्ञायाम्। (१०६/३८४०)

बहुव्रीहौ समासे विश्वशब्दः पूर्वपदं सञ्ज्ञायां विषयेऽन्तोदात्तं भवति। विश्वदेवः। विश्वयशाः। विश्वमहान्। पूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं प्राप्तम्। बहुव्रीहौ इति किम्? विश्वे [9]च ते देवाः विश्वदेवाः। सञ्ज्ञायाम् इति किम्? विश्वे देवा अस्य विश्वदेवः। विश्वामित्रः, विश्वाजिनः इत्यत्र 'सञ्ज्ञायां मित्राजिनयोः' (६.२.१६५/३८९९) इत्येतद् भवति परत्वात्। बहुव्रीहौ इत्येतदधिक्रियते प्रागव्ययीभाव[10]सञ्ज्ञानात् (६.२.१२१/३८५५)॥

## उदराश्वेषुषु। (१०७/३८४१)

उदर अश्व इषु इत्येतेषु [11]उत्तरपदेषु बहुव्रीहौ समासे सञ्ज्ञायां विषये पूर्वपदमन्तोदात्तं भवति। वृकोदरः। दामोदरः। हर्यश्वः। यौवनाश्वः। [12]सुवर्णपुङ्खेषुः। महेषुः॥

---

1. जनपदादिषु ह. 2. च इत्यधिकम् ह. 3. उदाहरणमिदं नास्ति ब. 4. पाणिनीयाः ह. 5. तद्वत्सु उत्तरपदेषु फ. 6. पूर्वपाञ्चालकः नास्ति फ. 7. च वा फ. 8. उत्तरपदग्रहणात् फ. 9. च ते नास्ति क. 10. °संशब्दनात् क.फ. 11. उपपदेषु फ. 12. सुवर्णपुज्जेषुः ह, सुवर्णेषुः क.